संस्कृतवार्ता:

03.08.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी कृष्यर्थशस्त्रिणां द्वात्रिंशत्तमस्य अन्ताराष्ट्रियसम्मेलनस्य उद्घाटनं विहितवान् । सम्बोधितवान् च भारतं खाद्यसमृद्धराष्ट्रमस्ति सममेव वैश्विकखाद्यसुरक्षायाः, वैश्विक-पोषणसुरक्षायाः च उपायेषु संलग्नमस्ति।

· केरलराज्ये वायनाडक्षेत्रे भूस्खलनप्रभावितक्षेत्रेषु सेनाद्वारा मानवीयसाहाय्योद्धार-कार्याणि नैरन्तर्येण प्रचलन्ति।

· बाङ्ग्लादेशे आरक्षणविरोधि-प्रदर्शनकारिण: नवसूत्रगताभ्यर्थनानि गृहीत्वा श्व: आरभ्य देशव्यापिन: असहयोगक्रान्ते: घोषणां कृतवन्त: ।

· अमरीकादेश: पश्चिमैशियायां वर्धमानां व्याकुलताम् अन्वीक्ष्य स्वीयसैन्योपस्थिति-संवर्धयितुं निर्णयं निर्णीतवान्।

कृष्यर्थशस्त्रिसम्मेलनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् भारतं खाद्यसमृद्धराष्ट्रमस्ति सममेव वैश्विकखाद्यसुरक्षायाः वैश्विक-पोषणसुरक्षायाः च उपायेषु संलग्नमस्ति। असौ अग्रे अवदत् यत्, सर्वकारः संशोधनैः सह कृषिक्षेत्रं सुदृढं कुर्वन् अस्ति अथ च अस्योद्देश्यं कृषकाणां जीवने संशोधनस्य आनयनं वर्तते । अद्य नवदिल्ल्यां कृष्यर्थशस्त्रिणां द्वात्रिंशत्तम् अन्ताराष्ट्रिय-सम्मेलनम् सम्बोधयन् श्रीमोदी प्रोक्तवान् यत् कृषिः प्रशासनस्य आर्थिकनीतेः केन्द्रबिन्दुः अस्ति इति। अनेन पुनः भणितं यत् भारतं तृणधान्यानां, दुग्धस्य, द्विदलानाम् उपस्कराणां च बृहत्तमः उत्पादकदेशो विद्यते |प्रधानमन्त्री उक्तवान् यत् भारतं रासायनिक-मुक्त-प्राकृतिक-कृषिं प्रवर्धयति। अस्य वित्तीयवर्षस्य केन्द्रीयायव्ययकेऽपि सततकृषेः कृते ध्यानं प्रदीयते। श्रीमोदी अभिव्यक्तवान् यत् प्रशासनेन गतदशवर्षेषु नवशताधिकैकसहस्रं नूतनानाम् ऋतु -अनुकूल -सस्यानाम्

अनेकप्रकाराः प्रदत्ताः । अमुना भणितं यत् देशस्य कृषिक्षेत्रे प्राविधिक-प्रौद्योगिकीमपि उपयुञ्जते अपि च प्रधानमन्त्री किसान-सम्मान-निधि-योजनान्तर्गतं, एकेन नुन्दनेन सह दशकोटिः कृषकाणां वित्तकोषेषु धनं स्थानान्तरितं जातम् । एतस्मिन् अन्ताराष्ट्रियसम्मेलने प्रायशः पञ्चसप्ततिः देशानाम् सहस्राधिकाः प्रतिनिधयः भागं गृह्णन्ति| अस्य वर्षस्य सम्मेलनस्य विषयः अस्ति- सतत कृषि-खाद्य-प्रणालीदिशिपरिवर्तनम्। अस्मिन् अवसरे केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत्, प्रधानमन्त्रिणः श्रीमोदिनः नेतृत्वे भारतस्य कृषिवृद्धिः निरन्तरं विश्वे एव सर्वाधिकी वृद्धिः विद्यते इति।

<u>केरल वायनाड:</u>

केरलराज्ये वायनाडक्षेत्रे भूस्खलनक्षेत्रेषु सेनाद्वारा मानवीय-साहाय्योद्धार-कार्याणि नैरन्तर्येण प्रचलन्ति। अद्य पञ्चमे दिने त्रयोदशशताधिकानि उद्धारकदलानि तथा च यन्त्राणि परिष्कृतानि उपकरणानि च अन्वेषणकार्ये संलग्नानि सन्ति। सेना-आपत्मोचनबल-इत्यादीभिः दलैः सह उद्धारकर्मचारिणः शवानाम् अन्वेषणे निरताः सन्ति

<u>शाह-हर घर तिरंगा</u>

केन्द्रीयगृहमन्त्री अमितशाहः सर्वान् नागरिकान् आग्रहं कृतवान् यत् ते हरगृहतिरंगा-इत्यभियाने दत्तचिताः भवेयुः पुनश्च एतस्मिन् अभियाने उत्साहेन भागं गृह्णन्तु इति। सामाजिक-संजालीयेकस्मिन् सन्देशे श्रीशाहः जनान् त्रिवर्णात्मकं ध्वजोत्तोलनम् अगस्तमासस्य नव दिनाङ्कात् पञ्चदश दिनाङ्कपर्यन्तं स्वगृहेषु प्रदर्शयितुं वा आहूतवान्। सः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः हरघरतिरङ्गा-अभियानं विगतवर्षद्वये राष्ट्रिय-आन्दोलन रूपेण विकसितम् अस्ति। श्री शाहः जनान् उक्तवान् यत् ते ध्वजेन सह सेल्फी स्वच्छाया चित्रं इति गृह्णन्तु, तथा च हरघर तिरङ्गा इति सन्जालपुटे harghartiranga.com इत्यत्र प्रेषयन्तु।

## सर्वोच्चन्यायालय-लोकन्यायालय:

सर्वोच्चन्यायालयद्वारा आयोजितस्य विशिष्ट-लोक-न्यायालयस्य अद्य अन्तिम: दिवसो विद्यते। अस्य प्रमुखोद्देश्यं नागरिकेभ्य: यथोचितं सरलं त्वरितन्यायप्रदानञ्चास्ति। सर्वोच्च न्यायालयेन स्वीयस्य पञ्चसप्तति: तमस्य वार्षिकोत्सवस्य उपलक्ष्ये अयं पदक्षेप: उत्थापित:। अवधेयमस्ति यत् लोकन्यायालया: सरलं कौशलयुतञ्च न्यायप्रदानं कुर्वन्ति इति। यत् द्रुतगतिर्युतं अल्पमूल्ययुतं च भवति। अत्रावसवरे सत्रं सम्बोधयन् विधिन्यायमन्त्री अर्जुनराममेघवाल: प्रख्यापितवान् यत् अस्मिन् लोकन्यायालये एकसहस्राधिकं प्रकरणानां निदानमपि जातम् । तदनु समारोहे मुख्यन्यायाधीश: डी.वाई. चन्द्रचूड: अपि लोकन्यायालस्य समिति संरचना विषयं प्रख्यापितवान्।

## बाङ्ग्लादेश: - प्रदर्शनकारिण:

बाङ्ग्लादेशे आरक्षणविरोधि प्रदर्शनकारिण: साम्प्रतिके काले जातान् वधान् विरूध्य प्रदर्शनं कर्तुं अपि च नवसूत्रगताभ्यर्थनानि प्रति बलं दातुं च श्व: आरभ्य देशव्यापि-क्रान्ते: घोषणां कृतवन्त: एते प्रदर्शनकारिण: बाड्ग्लादेशे मञ्चस्था: भवन्त: प्रदर्शनं कुर्वन्ति। भेदभावि-रोधि-विद्यार्थी-क्रान्ते: समन्वयकद्वयेन ह्य: विभिन्नेषु सामाजिक सञ्चारपटलेषु निजकार्यक्रमा: उद्घोषिता: सप्ताहद्वयस्यान्ते बाड्ग्लादेशे ह्य: जातायां हिंसायां विविधेषु स्थलेषु द्वौ जनौ दिवङ्गतां प्राप्तवन्तौ अनेके च व्रणिता: जाता:। ह्य: सायं शासनारूढस्य अवामीलीग इत्येतस्य महासचिव: मार्गपरिवहन मन्त्री च ओबैदुल-कादर: ढाकायां जाते वार्ताहर-सम्भाषणे कथितवान् यत् सुरक्षाकर्मिर्भि: विद्यार्थिन: नैव पीडितव्य: तथा च कारावासे न गृहीतव्या: इति।

## संयुक्तराष्ट्र-सैन्यबलम्

अमरीकादेश: पश्चिमैशियायां वर्धमानां व्याकुलताम् अन्वीक्ष्य स्वीयसैन्योपस्थितिसंर्वधनाय निर्णयं निर्णीतवान्। परिवर्तनमिदं इजराइलद्वारा अधुनावधौ हमास-हिजबुल्लाह-इत्यनयो: नेतृषु कृतप्रहाराणां प्रत्युत्तरे पश्चिमैशियायां अभिमुखहिंसाम् अभिलक्ष्य समागतमस्ति। एतेषां प्रहाराणाम् अनन्तरं नैरन्तर्येण कठोराचरणस्य समाह्वनानि अपि आगतानि सन्ति। अमरीकाया: रक्षाविभागेन एकस्मिन् प्रसङ्गे ख्यापितं यत् रक्षामन्त्री लॉयड-ऑस्टिनइत्येष: यूरोपीय-पश्चिमैशिया-क्षेत्रयो: अतिरिच्य बैलिस्टिक-प्रक्षेपास्त्र-रक्षा-सक्षम-समूहान् नियोजयितुम् अपि आदेशं प्रदत्तवान्। अमरीकादेशीय: रक्षाविभाग: समुदीरितवान् यत् असौ एकं योद्धृ विमानं पश्चिमैशिया क्षेत्रं प्रति नेष्यतिति। अवधेयं वर्तते यत् ईरानदेशस्य राजधान्यां तेहराननगरे हमासनेतु: इस्माइल हानियेह इत्येतस्य मङ्गलवासरे च बेरूतनगरे वरिष्ठस्य हिजबुल्लाह-इत्यस्य सेनापते: फौद शुकुर इत्यतस्य च वधेन क्षेत्रीययुद्धस्य पूर्वानुमानं सङ्कटं च स्त: । प्रत्युत्तरे च ईरानदेशेनापि प्रत्युत्तरकठोराचरणस्य समाह्वानं प्रदत्तम्।